# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -शास्त्रिप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ७<br>(C.E.- 1.1.1. New ) | गुणा: - ७० |
| विषय: - वास्तुशास्त्रम् | | समय: -११.३० त: ०२.३० |
| दिनाङ्क: - १६/१०/२०१९ | सन्दर्भग्रन्थ: - वास्तुमाणिक्यरत्नाकरम् / मुहूर्तचिन्तामणि: | |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितेषु क्योश्चित् द्वयो: सान्वयं व्याख्यां कुरुत।** **१०**

(१) यदा त्वेकभे सप्तमे चैव ग्रामे तदा वैरमाहु: त्रिषष्ठे च हानि:।
चतुर्थाष्टरिष्फे भवेद् रोगमृत्यु: शुभं शेषभावे भवेद् भूमिदेवा:॥

(२) यदा पश्चिमे पूर्व भागे च दीर्घा भवेदुच्चता चोत्तरे दक्षिणे च।
तदा नागपृष्ठं हि ज्ञात्वा बुधेन्द्रा:, निवासे कृते पुत्रहानिस्तदा स्यात्॥

(३) गृहभं वसुभिर्भक्तं व्ययं शेषं प्रकीर्तितम्।
पर्वादित: दिक्षुशाला चन्द्रो बाहु: कृतो वसु:॥

**प्रश्न: २ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **१०**

(१) पिण्डप्रकारा: ग्रन्थोक्तदिशा वर्णयत।

(२) आयविचार: वर्णयत।

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितेषु द्वयो: सान्वयं व्याख्यां कुरुत।** **१०**

(१) अजिरे गृहबाह्ये तु चालिन्दं गृहरक्षकम्।
अनेकस्तम्भकलशैर्युक्तं कुर्यात् समाहित:॥

(२) गृहीत्रिगृहाणीषुगेहानिसप्तगृहाण्यङ्कगेहानि शम्भोर्गृहाणि।
अनङ्गगृहाणीषुचन्द्रगृहाणि विनिर्माय वासं प्रकुर्य्याद् यथेष्टम्॥

(३) मृगे पुष्ये ध्रुवे तोये, पौष्णे तोयपतौ तथा।
शुक्रेन्दुवारे सद्योगे तडागारम्भणं शुभम्॥

**प्रश्न: ४ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखतु।** **१०**

(१) वास्त्वर्चनपद्धति: ग्रन्थाधारेण दर्शयत।

(२) गृहारम्भकुण्डलीफलम् ग्रन्थाधारेण विवेचयत।

## तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितेषु कयोश्चित् द्वयोः सान्वयं व्याख्यां कुरुत। १०**

(१) यद्धं द्वयङ्कसुतेशदिङ्मितमसौ ग्रामः शुभो नामभात् –
स्वं वर्गं द्विगुणं विधाय परवर्गाढ्यं गजैः शेषितम्।
काकिण्यस्त्वनयोश्च तद् विवरतो यस्याधिकाः सोऽर्थदो –
ऽथ द्वारं द्विजवैश्यशूद्रनृपराशीनां हितं पूर्वतः ॥

(२) लाभो रामैः पृच्छगौ स्वामिनाशो वेदैर्नैः स्व्यं वामकुक्षौ मुखस्थैः।
रामैः पीडा सन्ततं चार्कधिष्ण्यादश्वै रुद्रैर्दिग्भिरुक्तं ह्यसत्सत् ॥

(३) ध्रुवधान्ये जयनन्दौ खरकान्तमनोरमं सुमुखदुर्मुखोऽग्रं च।
रिपुदं वित्तदं नाशं चाक्रन्दं विपुलविजयाख्यं स्यात् ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु। १०**

(१) गृहारम्भे द्वारचक्रम्।

(२) राशिपरत्वेन ग्रामनिवासे निषिद्धस्थानानि प्रदर्शयत।

## चतुर्थान्वितिः

**प्रश्नः ४ अधोलिखितेषु दशप्रश्नानामातिलघूत्तराणि देयानि। १०**

(१) ऐशान्यां राहोः मुखं कदा भवति ?

(२) उत्तराभिमुखगृहस्य नाम किम् ?

(३) रिक्तातिथिषु गृहारम्भः भवति न वा ?

(४) भोजनालयः गृहस्य कस्मिन् कोणे भवति ?

(५) आयाः कति ? के च ते ?

(६) ब्राह्मणानां का वर्णयुक्ता भूमिः श्रेष्ठा भवति ?

(७) सूर्यस्य दशायां किम् फलं भवति ?

(८) ध्रुवादि कति गेहानि सन्ति ?

(९) गृहारम्भस्य कानि नक्षत्राणि सन्ति ?

(१०) द्वारशाखास्थापने रोहिणी नक्षत्रं शुभं वा न ?

(११) उत्तरायणे गृहप्रवेशः शुभं भवति वा न ?

(१२) कूपारम्भे के वाराः श्रेष्ठाः भवन्ति ?

(१३) वेदः शब्देन का संख्या ग्राह्या ?

(१४) रुद्राः कति सन्ति ?

(१५) ॐ अपवित्रः पवित्रो वा इति मन्त्रेण किं धारणीयम् ?

--००--